# RAMAKRISHNA MISSION VIDYAMANDIRA

Belur Math, Howrah – 711 202

## POST GRADUATE ADMISSION TEST – 2022
## SANSKRIT

Date : 22-08-2022 **Full Marks : 40** Time : 11.00 am – 12.30 pm

---

**सर्वे प्रश्ना: समाधेया:**

1. हेतुकरणयो: मध्ये भेद: सोदाहरणं वाच्य:। (5)

2. 'समसनं समास:' अथवा 'समस्यते य: स समास:'– अनयो: कतरद्युक्तम्? सोदाहरणं वाच्यम्। (5)

3. वनं वह्निमद् नीलधूमात् – इत्यत्र अन्नम्भट्टानुसारी हेत्वाभास: निर्णेय:। (5)

4. दण्ड: शास्ति प्रजा: सर्वा दण्ड एवाभिरक्षति।
   दण्ड: सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधा: ।। – श्लोकस्यास्य व्याख्या करणीया । (7)

5. इदं किलाव्याजमनोहरं वपुस्तप:क्षमं साधयितुं य इच्छति।
   ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।।
   – अस्य श्लोकस्य संक्षेपेण भावार्थं प्रतिपाद्य छन्दोऽलङ्कारनिर्णय: लक्षणनिर्देशपुर:सरं करणीय:। (3+5)

6. प्रबन्धो विरचनीय:। (10)
   धर्मो रक्षति रक्षित:

———— × ————